# Narada Bhakti Sutras

# નારદભક્તિસૂત્રાણિ

## Document Information

Text title : nAradabhaktisUtra

File name : nAradabhaktisUtra.itx

Category : sUtra, major_works

Location : doc_z_misc_major_works

Author : Naradamuni

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Sage Narada@s Aphorism of Devotion

Latest update : February 9, 1998, March 15, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નારદભક્તિસૂત્રાણિ

પ્રથમોऽધ્યાયઃ

પરભક્તિસ્વરૂપમ્

અથાતો ભક્તિં વ્યાખ્યાસ્યામઃ । ૧ - ૧.૦૧

સા ત્વસ્મિન્ પરપ્રેમરૂપા । ૨ - ૧.૦૨

અમૃતસ્વરૂપા ચ । ૩ - ૧.૦૩

યલ્લબ્ધ્વા પુમાન્ સિદ્ધો ભવતિ અમૃતો ભવતિ તૃપ્તો ભવતિ । ૪ - ૧.૦૪

યત્પ્રાપ્ય ન કિઞ્ચિદ્ વાઞ્છતિ ન શોચતિ ન દ્વેષ્ટિ ન રમતે નોત્સાહી ભવતિ । ૫ - ૧.૦૫

યજ્જ્ઞાત્વા મત્તો ભવતિ સ્તબ્ધો ભવતિ આત્મારામો ભવતિ । ૬ - ૧.૦૬

સા ન કામયમાના નિરોધરૂપત્વાત્ । ૭ - ૧.૦૭

નિરોધસ્તુ લોકવેદવ્યાપારન્યાસઃ । ૮ - ૧.૦૮

તસ્મિન્નનન્યતા તદ્વિરોધિષૂદાસીનતા ચ । ૯ - ૧.૦૯

અન્યાશ્રયાણાં ત્યાગોનન્યતા । ૧૦ - ૧.૧૦

લોકવેદેષુ તદનુકૂલાચરણં તદ્વિરોધિષૂદાસીનતા । ૧૧ - ૧.૧૧

ભવતુ નિશ્ચયદાર્ઢ્યાદૂર્ધ્વં શાસ્ત્રરક્ષણમ્ । ૧૨ - ૧.૧૨

અન્યથા પાતિત્યશઙ્કયા । ૧૩ - ૧.૧૩

લોકોऽપિ તાવદેવ ભોજનાદિ વ્યાપારસ્ત્વાશરીરધારણાવધિ । ૧૪ - ૧.૧૪

તલ્લક્ષણાનિ વાચ્યન્તે નાનામતભેદાત્ । ૧૫ - ૧.૧૫

પૂજાદિષ્વનુરાગ ઇતિ પારાશર્યઃ । ૧૬ - ૧.૧૬

કથાદિષ્વિતિ ગર્ગઃ । ૧૭ - ૧.૧૭

આત્મરત્યવિરોધેનેતિ શાણ્ડિલ્યઃ । ૧૮ - ૧.૧૮

નારદસ્તુ તદર્પિતાખિલાચારતા તદ્વિસ્મરણે પરમવ્યાકુલતેતિ । ૧૯ - ૧.૧૯

અસ્ત્યેવમેવમ્ । ૨૦ - ૧.૨૦

યથા વ્રજગોપિકાનામ્ । ૨૧ - ૧.૨૧

તત્રાપિ ન માહાત્મ્યજ્ઞાનવિસ્મૃત્યપવાદઃ । ૨૨ - ૧.૨૨

તદ્વિહીનં જારાણામિવ । ૨૩ - ૧.૨૩

નાસ્ત્યેવ તસ્મિન્ તત્સુખસુખિત્વમ્ । ૨૪ - ૧.૨૪

## દ્વિતીયોઽધ્યાયઃ

## પરભક્તિમહત્ત્વમ્

સા તુ કર્મજ્ઞાનયોગેભ્યોઽપ્યધિકતરા । ૨૫ - ૨.૦૧

ફલરૂપત્ત્વાત્ । ૨૬ - ૨.૦૨

ઈશ્વરસ્યાપ્યભિમાનદ્વેષિત્વાત્ દૈન્યપ્રિયત્વાત્ ચ । ૨૭ - ૨.૦૩

તસ્યાઃ જ્ઞાનમેવ સાધનમિત્યેકે । ૨૮ - ૨.૦૪

અન્યોન્યાશ્રયત્વમિત્યન્યે । ૨૯ - ૨.૦૫

સ્વયં ફલરૂપતેતિ બ્રહ્મકુમારઃ । ૩૦ - ૨.૦૬

રાજગૃહભોજનાદિષુ તથૈવ દૃષ્ટત્વાત્ । ૩૧ - ૨.૦૭

ન તેન રાજા પરિતોષઃ ક્ષુચ્છાન્તિર્વા । ૩૨ - ૨.૦૮

તસ્માત્ સૈવ ગ્રાહ્યા મુમુક્ષુભિઃ । ૩૩ - ૨.૦૯

## તૃતીયોઽધ્યાયઃ

## ભક્તિસાધનાનિ

તસ્યાઃ સાધનાનિ ગાયન્ત્યાચાર્યાઃ । ૩૪ - ૩.૦૧

તત્તુ વિષયત્યાગાત્ સઙ્ગત્યાગાત્ ચ । ૩૫ - ૩.૦૨

અવ્યાવૃત્તભજનાત્ । ૩૬ - ૩.૦૩

લોકેઽપિ ભગવદ્ગુણશ્રવણકીર્તનાત્ । ૩૭ - ૩.૦૪

મુખ્યતસ્તુ મહત્કૃપયૈવ ભગવત્કૃપાલેશાદ્ વા । ૩૮ - ૩.૦૫

મહત્સઙ્ગસ્તુ દુર્લભોઽગમ્યોઽમોઘશ્ચ । ૩૯ - ૩.૦૬

લભ્યતેઽપિ તત્કૃપયૈવ । ૪૦ - ૩.૦૭

તસ્મિંસ્તજ્જને ભેદાભાવાત્ । ૪૧ - ૩.૦૮

તદેવ સાધ્યતાં તદેવ સાધ્યતામ્ । ૪૨ - ૩.૦૯

દુસ્સઙ્ગઃ સર્વથૈવ ત્યાજ્યઃ । ૪૩ - ૩.૧૦

કામક્રોધમોહસ્મૃતિભ્રંશબુદ્ધિનાશકારણત્વાત્ । ૪૪ - ૩.૧૧

તરઙ્ગાયિતા અપીમે સઙ્ગાત્ સમુદ્રાયન્તે । ૪૫ - ૩.૧૨

કસ્તરતિ કસ્તરતિ માયામ્ યઃ સઙ્ગં ત્યજતિ યો મહાનુભાવં સેવતે નિર્મમો ભવતિ । ૪૬ - ૩.૧૩

યો વિવિક્તસ્થાનં સેવતે યો લોકબન્ધમુન્મૂલયતિ નિસ્ત્રૈગુણ્યો ભવતિ યોગક્ષેમં ત્યજતિ । ૪૭ - ૩.૧૪

યઃ કર્મફલં ત્યજતિ કર્માણિ સંન્યસ્યતિ તતો નિર્દ્વન્દ્વો ભવતિ । ૪૮ - ૩.૧૫

યો વેદાનપિ સંન્યસ્યતિ કેવલમવિચ્છિન્નાનુરાગં લભતે । ૪૯ - ૩.૧૬

સ તરતિ સ તરતિ સ લોકાંસ્તારયતિ । ૫૦ - ૩.૧૭

ચતુર્થોऽધ્યાયઃ

પ્રેમનિર્વચનમ્

અનિર્વચનીયં પ્રેમસ્વરૂપમ્ । ૫૧ - ૪.૦૧

મૂકાસ્વાદનવત્ । ૫૨ - ૪.૦૨

પ્રકાશતે ક્વાપિ પાત્રે । ૫૩ - ૪.૦૩

ગુણરહિતં કામનારહિતં પ્રતિક્ષણવર્ધમાનં અવિચ્છિન્નં સૂક્ષ્મતરં અનુભવરૂપમ્ । ૫૪ - ૪.૦૪

તત્પ્રાપ્ય તદેવાવલોકતિ તદેવ શ ૃણોતિ તદેવ ભાષયતિ તદેવ ચિન્તયતિ । ૫૫ - ૪.૦૫

ગૌણી ત્રિધા ગુણભેદાદ્ આર્તાદિભેદાદ્ વા । ૫૬ - ૪.૦૬

ઉત્તરસ્માદુત્તરસ્માત્ પૂર્વ પૂર્વા શ્રેયાય ભવતિ । ૫૭ - ૪.૦૭

અન્ય માત્ સૌલભં ભક્તૌ । ૫૮ - ૪.૦૮

પ્રમાણાન્તરસ્યાનપેક્ષત્વાત્ સ્વયં પ્રમાણત્વાત્ । ૫૯ - ૪.૦૯

શાન્તિરૂપાત્ પરમાનન્દરૂપાચ્ચ । ૬૦ - ૪.૧૦

લોકહાનૌ ચિન્તા ન કાર્યા નિવેદિતાત્મલોકવેદત્વાત્ । ૬૧ - ૪.૧૧

ન તત્સિદ્ધૌ લોકવ્યવહારો હેયઃ કિન્તુ ફલત્યાગઃ તત્સાધનં ચ । ૬૨ - ૪.૧૨

સ્ત્રીધનનાસ્તિકચરિત્રં ન શ્રવણીયમ્ । ૬૩ - ૪.૧૩

અભિમાનદમ્ભાદિકં ત્યાજ્યમ્ । ૬૪ - ૪.૧૪

તદર્પિતાખિલાચારઃ સન્ કામક્રોધાભિમાનાદિકં તસ્મિન્નેવ કરણીયમ્ । ૬૫ - ૪.૧૫

ત્રિરૂપભઙ્ગપૂર્વકમ્ નિત્યદાસ્યનિત્યકાન્તાભજનાત્મકં પ્રેમ કાર્યં પ્રેમૈવ કાર્યમ્ । ૬૬ - ૪.૧૬

પઞ્ચમોऽધ્યાયઃ

મુખ્યભક્તિમહિમા

ભક્તા એકાન્તિનો મુખ્યાઃ । ૬૭ - ૫.૦૧

કણ્ઠાવરોધરોમઞ્ચાશ્રુભિઃ પરસ્પરં લપમાનાઃ પાવયન્તિ કુલાનિ પૃથિવીં ચ । ૬૮ - ૫.૦૨

તીર્થીકુર્વન્તિ તીર્થાનિ સુકર્મી કુર્વન્તિ કર્માણિ સચ્છાસ્ત્રીકુર્વન્તિ શાસ્ત્રાણિ । ૬૯ - ૫.૦૩

તન્મયાઃ । ૭૦ - ૫.૦૪

મોદન્તે પિતરો નૃત્યન્તિ દેવતાઃ સનાથા ચેયં ભૂર્ભવતિ । ૭૧ - ૫.૦૫

નાસ્તિ તેષુ જાતિવિદ્યારૂપકુલધનક્રિયાદિ ભેદઃ । ૭૨ - ૫.૦૬

યતસ્તદીયાઃ । ૭૩ - ૫.૦૭

વાદો નાવલમ્બ્યઃ । ૭૪ - ૫.૦૮

બાહુલ્યાવકાશત્વાદ્ અનિયતત્ત્વાચ્ચ । ૭૫ - ૫.૦૯

ભક્તિશાસ્ત્રાણિ મનનીયાનિ તદુદ્બોધકર્માણિ કરણીયાનિ । ૭૬ - ૫.૧૯

સુખદુઃખેચ્છાલાભાદિત્યક્તે કાલે પ્રતીક્ષ્યમાણે ક્ષણાર્ધમપિ વ્યર્થં ન નેયમ્ । ૭૭ - ૫.૧૧

અહિંસાસત્યશૌચદયાસ્તિક્યાદિચરિત્રાણિ પરિપાલનીયાનિ । ૭૮ - પ.૧૨
સર્વદા સર્વભાવેન નિશ્ચિન્તૈર્ભગવાનેવ ભજનીયઃ । ૭૯ - પ.૧૩
સઙ્કીર્ત્યમાનઃ શીઘ્રમેવાવિર્ભવત્યનુભાવયતિ ભક્તાન્ । ૮૦ - પ.૧૪
ત્રિસત્યસ્ય ભક્તિરેવ ગરીયસી ભક્તિરેવ ગરીયસી । ૮૧ - પ.૧૫
ગુણમાહાત્મ્યાસક્તિ-રૂપાસક્તિ-પૂજાસક્તિ-સ્મરણાસક્તિ-દાસ્યાસક્તિ-સખ્યાસક્તિ-
વાત્સલ્યસક્તિ-કાન્તાસક્તિ-આત્મનિવેદનાસક્તિ-તન્મયતાસક્તિ-પરમવિરહાસક્તિ-રૂપા
એકધા અપિ એકાદશધા ભવતિ । ૮૨ - પ.૧૬
ઇત્યેવં વદન્તિ જનજલ્પનિર્ભયાઃ એકમતાઃ
કુમાર-વ્યાસ-શુક-શાણ્ડિલ્ય-ગર્ગ-વિષ્ણુ-
કૌણ્ડિણ્ય-શેષોદ્ધવારુણિ-બલિ-હનુમદ્-વિભીષણાદયો ભક્ત્યાચાર્યાઃ । ૮૩ - પ.૧૭
ય ઇદં નારદપ્રોક્તં શિવાનુશાસનં વિશ્વસિતિ શ્રદ્ધતે સ ભક્તિમાન્
ભવતિ સઃ પ્રેષ્ટં લભતે સઃ પ્રેષ્ટં લભતે । ૮૪ - પ.૧૮

---

પ્રથમોઽધ્યાયઃ - પરભક્તિસ્વરૂપમ્ । સૂત્ર ૧-૨૪
દ્વિતીયોઽધ્યાયઃ - પરભક્તિમહત્ત્વમ્ । સૂત્ર ૨૫-૩૩
તૃતીયોઽધ્યાયઃ - ભક્તિસાધનાનિ । સૂત્ર ૩૪-૫૦
ચતુર્થોઽધ્યાયઃ - પ્રેમનિર્વચનમ્ । સૂત્ર ૫૧-૬૬
પઞ્ચમોઽધ્યાયઃ - મુખ્યભક્તિમહિમા । સૂત્ર ૬૭-૮૪

---

Encoded and proofread by Sunder Hattangadi

*Narada Bhakti Sutras*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*